# बृहत्संहितायाः विशिष्टम् अध्ययनम्

वटोदरसंस्कृतमहाविद्यालयस्य

वाचस्पति (Ph.D ) इति

उपाधये प्रस्तुतः

**शोधप्रबन्धः**

(सारांशिका-**SYNOPSIS**)


शोधनिर्देशकः
डॉ. हरिप्रसादपाण्डेयः

अनुसन्धात्री
सुमित्राबेन के. ठक्कर



वटोदर संस्कृतमहाविद्यालय :
म.स. विश्वविद्यालयः
वटोदरम्

# संशोधनस्यअभ्यन्तरे। सारांशिका (Synopsis)

## बृहत्संहितायाः विशिष्टम् अध्ययनम्

बृहत्संहितायाः कर्तुः आचार्यवराहमिहिरः विदुषां सुविदितः। संहिताग्रन्थेषु बृहत्संहितायाः स्थानं शिखरायमाणं वर्तते। अयं ग्रन्थः ज्यौतिषशास्त्रस्य तथा वास्तुशास्त्रस्य सङ्गमतीर्थभूतः विद्वद्वृन्देषु जागर्तितराम्। आछात्रकालात् मया नैकधा तीर्थभूते ग्रन्थेऽस्मिन् निमज्जनोन्मज्जनम् अकारि, फलतः ज्ञानरत्नानि अलाभि च । अतः ज्यौतिषवास्तुशास्त्रयोः आचार्यपदवीप्राप्त्यनन्तरम् अहं तथा च पदवी प्राप्तेः अनन्तरम् उभयशास्त्रोपकारिणं ग्रन्थम् अमुं मम वाचस्पति (Ph.D.) पदवीप्राप्तये संशोधनस्य विषयत्वेन स्व्यकार्यम्।

अन्तरिक्षस्य अध्ययने बहूनि गूढाणि तत्वानि आविर्भववन्ति। उच्युतानन्द झा महोदयः संपादित बृहत्सहिताग्रन्थस्य प्रस्तावनायां प्रो. रामचन्द्र पाण्डेयमहोदयः उद्धरति–पेट्रिक मूरे महोदयः स्वग्रन्थे (Guide to the Moon) लिखति–

'The moon is shining down from a slightly misty sky with a lovely shimmering blueness like an electric glimmers, utterly unlike anything I have never seen before'

अतः एतादृशैः अध्ययनबिन्दुभिः सोत्साहं सम्प्रेरिताऽहं संशोधनकर्मणि। अस्य सारांशिका (Synopsis ) अग्रे संयोजिता वर्तते।

भारतीय संस्कृतिः, भारतीयपरंपरा, भारतीयविचारधारा च मह्यम् आबाल्यात् रोचते। एभिः सर्वैः संस्कृतभाषा गाढतया निबद्धा वर्तते।

अतः संस्कृते मम अभिरुचिः तदनु अभिनिवेशश्च प्रतिदिनम् अवर्धत। अतः B.A पदवी–ग्रहणानन्तरं मया वटोदरसंस्कृतमहाविद्यालये मम अभिरुचिं पूरपितुं प्रवेशः कृतः। क्रमशः अध्ययनं कुर्वाणा अहं ज्यौतिषशास्त्रम् वास्तुशास्त्रम् चादाय विशेषयोग्यतायाम् आचार्यपरीक्षाम् उत्तीर्णा अभवम्।

एवम् अध्ययनस्य पूर्तिः अजायत। अतः तस्य परमोत्कर्षं साधयितुं संशोधनकार्यं प्रति उत्सुका जाता, तत्रापि क्रमशः विश्वविद्यालयतः (Arts College) M.Phil पदवी (तत्वाचार्य) समासादिता। पश्चात् Ph.D अंगभूतं संशोधनकार्यं कर्तुम् मम मनसि प्रवलेच्छा जागरिता अभवत्।

आचार्यवराहमिहिरस्य नाम को न जानाति ? मम नितान्तम् आदरः अस्मिन् दैवज्ञे दार्शनिके वर्तते। अतः तेन विरचितस्य बृहत्संहिताख्यग्रंथस्य विशिष्टम् अध्ययनम् कर्तुं मया विचारितम्। पश्चात् मम मार्गदर्शकरूपेण वटोदर-संस्कृत महाविद्यालयस्य भूतपूर्वः प्रधानाचार्यः डॉ. हरिप्रसाद-पाण्डेयमहोदयः सुनिष्चितीकृतः। तेन गुरुणा सह विस्तरपूर्वकं चर्चाविचारणानन्तरम् उपरिनिर्दिष्टः बृहत्संहिताविषयः मया संशोधनरूपेण स्वीकृतः।

भारतीयज्यौतिषशास्त्रस्य तथा वास्तुशास्त्रस्य स्वरुपं परम्परां च अनुसृत्य गुरुशिष्य-परिपाट्या संहितानाम्अध्ययनं मया आरब्धम्। तत्र पुनः विधानं वर्तते "स्वाध्यायः अध्येतव्यः"। अस्य अर्थः न केवलं संहितागतमंत्राणां मुखेन पाठः एव करणीय :, अपि तु मन्त्राणां अर्थबोधः अपि कर्तव्यः। अर्थ –बोधः सरलतया भवेत् इति शिक्षा, कल्पः, व्याकरणं, निरुक्तं, ज्यौतिषं, तथा छंदः इति वेदस्य षड् अंगानि सन्ति। तत्र वेदप्रतिपादित– यज्ञ-यागादि -प्रारम्भार्थं, मध्ये विश्रामार्थं तथा च दिनान्ते तस्य पूर्ति – अर्थं समयस्य ज्ञानम् अपेक्षितम् आसीत्। सूर्यचन्द्रयोः संम्बंधि एतद् अत्र वैदिक- ज्यौतिषं इति नाम्ना प्रसिद्धिं गतम्। साम्प्रतकाले वर्तमानं ज्यौतिषं वैदिकज्यौतिषात् सर्वथा भिन्नम् अस्ति।

**पुराणन्यायमीमांसा धर्मशास्त्रङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।। १ ।।  याज्ञ. स्मृ.१३**

तानि परिण्यन्ते यथा-ऋग्वेदः,यजुर्वेदः, सामवेदः, अर्थववेदः- इति चत्वारो वेदाः वेदाक्रांति ।

**आर्युवेदो धनुर्वेदो गान्धर्वश्चेतिते त्रयः।**
**अर्थशास्त्रं चतुर्य तुं विद्या ह्ष्टदशैवतः।।  विष्णुपुराण-३.६ २५.२६**

चत्वारः वेदाः। षड् अङ्गानि। अष्टादश पुराणानि उपपुराणानि च।

न्यायशास्त्रं, मीमांसाशास्त्रं तथा धर्मशास्त्रं, पुराणानि इति मिलित्वा-च चतुर्दश विद्याः भवन्ति। आजीविकार्थं उपवेदानां निर्मितिः जाता, यथा आयुर्वेदः धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं च इति मिलित्वा १८ अष्टादश विद्याः भवन्ति। वेदमहत्त्वम् अनया रीत्या वेदेषुसंहिताग्रंथेषु षट्सु अंगेषु तथा च चतुर्दश-१४ विद्यासु अथ च १८ आष्टादश विद्यासु ज्यौतिषशास्त्रस्य समावेशः कृतः अस्ति। एतेन-अस्य प्राचीनज्यौतिषशास्त्रस्य मूल्यं कियत् अस्ति इति कथनस्य आवश्यकता नास्ति। पाणिनीयशिक्षायां निरूपितं यत् वेदपुरुषस्य नेत्र-स्थाने ज्यौतिषं वर्तते।

अनेन वेदपुरुषस्य नेत्रस्थानीयेन ज्यौतिषशास्त्रेण विना पदार्थस्य दर्शनं न शक्यं भवति इति अतिस्पष्टं भवति।

यद्यपि ज्योतिःशब्देन सूर्यचन्द्रताराग्रहादीनां बाोधः भवति तथापि प्रमुखतया ज्यौतिषशब्देन अत्र सूर्यस्य बोधः विशेषतया भवति। अतः ज्यौतिषं अर्थात् सूर्यस्य शास्त्रं इदं भवति। ज्योतिषां प्रभावेण मानवानां, प्राणिनां, पशूनां , खगानां, वनस्पतीनां समुद्रादि, जलराशीनाम् उपरि प्रभावः प्रसरति। एतेषां ज्योतिषां विशिष्टभ्रमणेन एव तिथयः, दिवसाः पक्षौ मासाः, अयनम् ऋतवः इत्यादि सर्वं संभवति। एतेषां सर्वेषां शास्त्रीयम् अध्ययनं ज्यौतिषशास्त्रे कृतं लभ्यते। एवं ज्यौतिषशास्त्रेण कालस्य विशिष्टः बोधः भवति। येन कालस्य नियंत्रणं नियमनं शक्यं भवति। प्राचीनकाले विविधयज्ञानां कालनिर्धारणविषये चिन्तनशैल्या ऋषिभिः ज्यौतिषशास्त्रस्य उपयोगः प्रारब्धः। एवं इदं यज्ञविषये प्रारंभ-विराम-समाप्ति-समयनियामकं एतत् शास्त्रं निर्मितम्।

व्यवहारेऽपि इष्टपदार्थग्रहणं तथा – अनिष्टपदार्थत्यागः नेत्रदर्शनेन एव समीक्ष्यते। इयं व्यवहारस्य रीतिः वैदिकयज्ञ-अंगे स्वीकृता। ज्यौतिषशास्त्रे यवनाचार्याणां योगदानं महत्त्वपूर्णं अस्ति। बृहत्संहितायाम् आचार्य वराहमिहिरस्य यवनाचार्याणां भूरि प्रशंसा कृता दृश्यते, यथा-

**म्लेच्छा हि यवनास्तेषु सम्यक्शास्त्रमिदं स्थितम्।**
**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्विजः।। १ ।।**

अर्थात् यवनाचार्यैः ज्यौतिषशास्त्रं साधु प्रतिपादितम्, अतः ते ऋषितुल्याः वंदनीयाः सन्ति तत्र यदि विद्यासंम्पनाः ब्राह्मणाः दैवज्ञाः भवन्ति तर्हि ते अतिशयानाः भवन्ति।

ये अष्टादश (१८) प्रसिद्धाः ज्यौतिषस्य पूर्वतः आचार्याः वर्तन्ते, तेषु यवनाचार्यस्य आदि गणना भवति। यवनेभ्यः ताजिकशास्त्रं अधीत्य नीलकण्ठाचार्यः नीलकण्ठीनामकं ग्रन्थ रत्नं विरचयांबभूव। अस्मिन् ग्रन्थे एकलाव्याः यवन शब्दाः अपि प्रयुक्ताः वर्तन्ते। ग्रन्थकारेण तान् यवनशब्दान् परिवर्त्य तेषां स्थाने समानार्थकाः संस्कृतशब्दाः न लिखिताः। तेन सिध्यति प्राचीनाः चिन्तकाः गुणग्राहकाः आसन्।

फलितज्यौतिषस्य प्रधानम् अंगं संहिता विभागः अस्ति।

अस्मिन् विभागे ग्रहचारादिकं वर्णनं, वायसविरुतं, काकवाणी, मृगचेष्टितं, श्वानचेष्टितं, गवेंगितम्, अश्वेंगितम्, हस्ति-चेष्टितम् निरुपितं वर्तते। अतः फलित-ज्यौतिषस्य एतत् प्रधानं अङ्गं वर्तते।

**<u>बृहत्संहिताग्रन्थः ज्यौतिषशास्त्रविषये विश्वकोषतुल्यः वर्तते।</u>**

अत्र ज्यौतिषशास्त्रस्य विषयाः सूक्ष्मतया केवलंन वर्णिताः, अपितु वास्तुशास्त्रस्य यथायोग्यं निरुपणं ग्रन्थकारेण कृतम्। सर्वेषु संहिताग्रन्थेषु बृहत्संहिता शिरोरत्नायते, इति न शंकालेशः अस्ति। ग्रन्थकारस्य आर्हन्ती दृश्यते अस्मिन् ग्रन्थे। ताम् आर्हन्तीं विशिष्टतया विश्लेषयितुकामा अहं बृहत्संहितां मम संशोधनस्य कार्यवर्तुलस्य केन्द्रबिन्दुं मानयामि। तथा हि ग्रन्थकारेण स्वग्रन्थे पंचसिद्धान्तिका विशदतया विवृता यथा पौलिष-रोमक- वासिष्ठ सौर- पैतामहाः एते सिद्धान्ताः। बृहत्संहिताशब्दे वर्तमानस्य “बृहत् ” शब्दस्य विवेचनं टीकाकृता भट्टोत्पलेन बृहज्जातके इत्थं कृतम्। बहुशः बहुशः इति। अर्थात् केवलं आकारेण बृहत्त्वं न किन्तु विषयवैविध्यं बहु अपि अत्र वर्णितम् अस्ति।

सर्वेऽपि जनाः स्वेषु स्वेषु गृहेषु निवसन्ति। गृहव्यवस्था-सम्बन्धिनः सर्वे विचाराः वास्तुशास्त्रे कृताः वर्तन्ते। यथा गृहनिर्माणात्प्राक् भूमिपरीक्षा भूमिशुभाशुभ-निर्णयः खातमुर्हूतादयः

इति प्राथमिकविषयाः तथा च गृहनिर्माणस्य विविधाः विषयाः अत्र वास्तुशास्त्र- विषयकाः सन्ति। भगवतः शंकरस्य प्रस्वेदात् जातः वास्तुपुरुषः एव वास्तुदेवता-रुपेण पूज्यते।

एतस्मिन् शोधप्रबंधे मया ज्यौतिष शास्त्रेण सह वास्तुशास्त्रस्यापि अल्पः समावेशः कृतः वर्तते। पंडितेषु, छात्रेषु, सामान्यवाचकेषु बृहत्संहितायाः स्थानं अजरंअक्षरं च वर्तते। अस्मिन- शोधप्रबंधे विषयनिरुपणस्य क्रमः तस्य विकासश्च वैज्ञानिक-रीत्या, मया प्रस्तुती कृतः। शोध-

प्रबंधस्य शैली यद्यपि प्रवाहपूर्वा वर्तते। अनेकेषां विदुषां सहयोगेन, मार्गदर्शनेन च मया कृतं परिश्रमपूर्णं मम शोधकार्यम् अध्येतृणाम् कृते उपकारि भविष्यति। अस्य क्रमशः अध्ययनेनैव तत्तु शक्यते।

शोधप्रबंधेऽस्मिन नव प्रकरणानि सोपानरुपेण निरुपितानि सन्ति। तेषां सोपानानां विवरणं संक्षेपेण प्रस्तूयते।

आदितः सोपानानि ज्यौतिषशास्त्र-विषयकाणि तथा पाश्चात्यानि प्रचीत्वारि सोपानानि वास्तुविषयकाणि सन्ति।

मम शोधग्रन्थे आहत्य दशसोपानानि समुपनिबद्धानि। तेषु १ तः ६ सोपानानि ज्योतिष-शास्त्रविषयकाणि तथा ७ तः ९ सोपानानि वास्तुशास्त्रविषयकाणि सन्ति। चरमं सोपानम् उपसंहारात्मकं वर्तते। तेषां सर्वेषां विवरणं यथाक्रमं निरूपितं वर्तते।

वेद-वेदांग ज्योतिष – वैदिकज्योतिष आधुनिक ज्यौतिष त्रिस्कंध ज्योतिष–संहिता-बृहत्संहिता- वराहमिहिर

ग्रन्थकृतः संक्षिप्तः परिचयः। ज्योतिषशास्त्रे यस्य नामाक्षराणि सुवर्णमयानि संन्ति, तस्य ज्योतिर्विदः आचार्यवराह-मिहिरस्य नाम कस्य न परिचितम् ?

संहिताग्रन्थेषु बृहतसंहिताग्रन्थः मुकुटायमानः अस्ति, मगधदेशे ईसवीये पू.पू. वर्षे अयं महान्विद्वान् जन्म लोभे। भगवान् सूर्यः तस्य कुलदेवता आसीत्। एक- कथानुसारेण वराहमिहिरः सूर्यात् वरदानं प्राप्तवान्। तस्य पितुः नाम अपि आदित्यदासः इति आसीत्। मिहिर-शब्दस्य अपि अर्थः सूर्यः एव आस्ति। कापिश्यक ग्रामे तस्य निवासः आसीत्। तत्र सूर्यमंदिरं प्रसिद्धम् आसीत्।

टीकाकृत् उत्पलः मन्यते यत् सः मगधदेशीयः आसीत्। "मगम्" अर्थात् सूर्यँ ध्यायंति जनाः अत्र इति मगधशब्दस्य अर्थः अपि सूर्य- सम्बन्धी एवं वर्तते। भविष्यपुराणे एवं वर्तते। मगं ध्यायन्ति एतस्मात् तेन ते मगधाः स्मृताः। वराहमिहिर उच्चकोटिकः कविः आसीत्। अस्य अनुभवः बृहत्संहिताग्रन्थे पदे पदे भवति। तस्य शब्द- प्रभुत्वं, छंदसांसामर्थ्यं व्याकरण पाण्डित्यं, इत्यादि विविध शास्त्रसंपन्न ज्ञानं समग्र ग्रन्थे अत्र तत्र दृश्यते।

तस्य अनेके ग्रन्थाः प्रसिद्धाः।

१) पंचसिद्धान्तिका।

२) जातकम्।

३) यक्षेश्वमेध्ययोगाः।

४) योगयात्रा।

५) विवाहपटलम्।

६) बृहतसंहिता।

बृहत्संहितायां जौतिषशास्त्रस्य तथा वास्तुशास्त्रस्य अदभुतः संगमः दृश्यते। अतः मया अयं विषयः मम विशिष्ट-संशोधन कार्यरूपेण स्वीकृतः।

आचार्य वराहमिहिरस्य विस्तृतः परिचयः पृथक् प्रकरणे मया प्रदतः।

- मम शोधकर्मणि अनेकैः विद्याकुशलैः विद्वद्भिः अमूल्यं मार्गदर्शनं कृतं साहाय्यं च प्रदत्तम्। ज्यौतिष-वास्तु-सांहित्य-धर्मशास्त्रादिषु शास्त्रेषु कृतभूरिपरिश्रमाः मुखमण्डलोपरि वर्तमान तेजसा ज्ञानवारिधिं पिशुनयन्तः डॉ. हरिप्रसादपाण्डेयगुरुचरणाः यथापूर्वं मम शोधकर्मणि मार्गदर्शकाः। उत्फुल्लसकलरोमा अहं तान्प्रति सप्रणति धन्यवादान् वितरामि.
- प्रा. योगेश ओझा महोदयाः अपि मम गुरवः सन्ति। मम शोधकर्मणि लेखनकार्य-परिमार्जनादिषु तैः स्वयोगदानं प्रद्वत्तम्। तेषाम् उपकारस्मरणं सप्रश्रयं कुर्वाणा धन्यभाक् भवामि।
- डॉ. रामपलशुक्लमहोदयैः अपि, अनेकशास्त्रनदीष्णैः समये समये अहं प्रेरिता, मार्गदर्शनेन सनाथीकृता। तान नमस्कृत्य उपकारं स्मरामि।
- डॉ. किशोरवैद्यः, डॉ. मीनापाठकः तथा डॉ. योगेशत्रिवेदी, डॉ. शास्त्रीकपीलदेव अेच., श्री सुरेश पटेल, डॉ.जागृतिजोशी बालाशिनोर ग्रामस्था आदि नैकेषाम् उपकारस्मरण करोमि।
- शोधप्रबन्धस्य लेखने टंकने परिभार्जने च यै यैः सहयोगः प्रदतत्तः तेषामपि उपकारं स्मरामि। एभिः सर्वैः यत कार्यं कृतं मम साहास्यार्थं तेन सन्तोषम् अनुभवति।
- मम जीवनसंगिनः श्री किरीटकुमारस्य तथा "भ्रातरौ रामलक्ष्मणौ इति मूर्तिमन्तौ मम द्वौ पुत्रौ श्रीयुतौ दर्शक-भौमिकौ मम प्रस्तुत शोधकर्मणि कटिबद्धौ आस्ताम्। तयोः स्वकीययोः अपि प्रसन्नतापूर्वकं स्मरणं करोमि ।"

# विषयसूचिः


१. **प्रथमं सोपानम्**

- ज्यौतिशास्त्रस्वरूपकथनम्
- ज्यौतिषशास्त्रस्य परिचयः
- वास्तुशास्त्रस्य परिचयः
- ग्रन्थकर्तुः परिचयः
- दैवज्ञलक्षणम्
- सांवत्सरसूत्राध्यायः

२. **द्वितीयं सोपानम्**

- चाराध्यायः

३. **तृतीयं सोपानम्**

- ग्रहभक्तियोगाध्यायः

४. **चतुर्थं सोपानम्**

- वायुवृष्टिअध्यायः

५. **पंचमं सोपानम्**

- अंतरिक्षोत्पाताध्यायः

६. **षष्ठं सोपानम्**

- प्रकीर्णाध्यायः

७. **सप्तं सोपानम्**

- वास्तुविद्या
- ब्राह्मणादिवर्ण गृहप्रमाणानि
- सर्वतोभद्रादिवास्तुलक्षणम्

८. **अष्टमं सोपानम्**

- वृक्षायुर्वेदः
- दकार्गलः
- रत्नपरीक्षणविषयः

९. **नवमं सोपानम्**

- पशुपक्षिलक्षणाध्यायः
- स्त्रीपुरुषलक्षणाध्यायः
- स्त्रीपुरुषराजचिह्नाध्यायः
- पशुपक्षिचेष्टा

१०. **उपसंहारः**

## प्रथमं सोपानम्

**ज्यौतिषशास्त्रस्य परिचय :**

ज्यौतिषमेकमागमशास्त्रमस्ति। ज्यौतिषशास्त्रं विज्ञाानमेवास्ति। तत्र नास्ति मतद्वयम्। ज्यौतिषशास्त्रान्तर्गताः अनेकविधाः विभागाः सन्ति। ज्यौतिषशास्त्रे अनन्तगूढार्थ-विषयाः सन्ति।

वर्तमानकालानुसारेण ज्यौतिषशास्त्रस्य उपयोगिता कया रीत्या भवति ? वर्तमानसमये एतस्य ज्यौतिषशास्त्रस्य पूर्वार्धभागः एकमान्यरूपेण स्वीकृतः आस्ति। अधुना भारतवर्षस्य एतत्-विषय सम्बन्धी अनेकविध शाखायां विज्ञानेन प्रमाणतया अधिकारः नैव भवति। एतत् सत्यमस्ति।

ज्यौतिषशास्त्रम् किमस्ति ? - सूर्यादि ग्रहाणां स्थित्यनुसारेण मनुष्येषु उत्पतिः एवं स्थितिः तथा विकासः एतेषां त्रयाणां विषये अनुकूलं तथा प्रतिकूलं विषयं ज्ञातुं शक्यते तत् शास्त्रस्य नाम ज्यौतिषशास्त्रमस्ति।

ज्यौतिषशास्त्रम् "सूर्यादिग्रहाणां बोधकं शास्त्रम्" तथा "कालगणना" प्रकार एव अस्ति।

प्राचीनकाले ब्रह्मशौनकभृगुच्यवनबृहस्पतिवशिष्ठपाराशरअत्रिमनुपौलस्त्यलोमशमरीचिअंगिरो-जैमिनि-व्यास-नारद-गर्ग-आर्यभट्ट-लल्ल-ब्रह्मगुप्त-वराहमिहिर-श्रीपति-भास्कराचार्य-मुनीश्वरज्ञान-राज-कमलाकरभट्टाः एते प्रधाना ज्योतिर्विदः विद्वांसः सन्ति। नवीनेषु नीलाम्बर-बापूदेव-सुधाकर-शङ्करबालकृष्ण-योगेशचन्द्र-केतकर-आप्टेप्रभृतयो विद्वांसः परिगण्यन्ते गणकत्वेन।

ब्रह्मदेवानुसारेण ज्यौतिषशास्त्रस्य एकं नाम वेदनेत्रमस्ति। वेदस्य हि षट्स्वङ्गेषु ज्यौतिषमन्यतमममिति तूक्तमेव। ज्यौतिषं हि वेदस्य चक्षूरूपमस्ति। किन्तु नैत्रसंज्ञकम्-निर्मितं-निष्कंलकम् ज्यौतिषशास्त्रं प्रत्यक्षचमत्कृतशास्त्रमस्ति।

**अप्रत्यक्षणि च शास्त्राणि विवादस्तेषु केवलम्।**
**प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्राकौं यत्र साक्षिणौ। बृहत्संहिता**

ज्यौतिषशास्त्रस्य प्रत्यक्षदर्शिरूपेण सूर्यः चन्द्रमाः च उभौ स्तः। ज्यौतिषशास्त्रे प्रत्यक्षं ग्रहगणितमस्ति। कारणं चन्द्रस्य श्रृङ्गोन्नति-ग्रहणं-प्रतियुति-ग्रहच्छाया-ग्रहस्यउदयास्तसमयानुसारेण निर्णयं कर्तुं शक्यते तद् शास्त्रम् ज्यौतिषमस्ति ज्यौतिषशास्त्रद्वारा मानवः सत्यम् उपयुक्तं च मार्गदर्शनं कर्तुं शक्यते।

अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समष्ट्या ज्योतिशब्देन उच्यन्ते। तेष्वपि यानि हि सदैकरूपगतीनि तानि नक्षत्रशब्देन ज्ञायन्ते।

ज्यौतिषशास्त्रं प्राचीनार्वाचीनग्रन्थानुसारेण ज्यौतिषे त्रयः स्कन्धाः सन्ति।

**सिद्धान्त संहिता होरारूपं स्कन्ध त्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमनुत्तमम्। बृहत्संहिता**

शास्त्रमिदं सिद्धान्त – संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तम् इति त्रिस्कन्धज्यौतिष-शब्देन अपि ज्ञायते। त्रयः स्कन्धाः एवमेव सन्ति।

(१) सिद्धान्तः (२) संहिता (३) होरा

**सिद्धान्ते :-** गणितं-खगोलं-ग्रहगणितं-पाटीगणितं-बीजगणितं-कालनिर्णयं एते विभागाः सन्ति। ब्रह्मवशिष्टः-सोमःसूर्यश्चेत्यस्य प्रवर्तक सन्ति। सिद्धान्त-ग्रन्थस्य विविध आचार्याः अनन्तर-मार्यभट्ट-ब्रह्मगुप्त-वराहमिहिर-भास्कराचार्य-कमलाकरप्रभृतयः। आर्षः-सूर्यसिद्धान्तः, आर्यभट्टस्य आर्यभटीयं, ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः कमलाकरस्य सिद्धान्ततत्त्वविवेकश्च सिद्धान्त स्कन्धस्य अस्य मान्या ग्रन्थाः।

**संहितायां:-** मुहूर्तम्-कालचक्रनिर्णयमस्ति। आर्षत्वेन बार्हस्पत्य-काश्यप-नारदसंहिताः सम्प्रति दृश्यन्ते। यद्यपि बहवः ऋषयः संहितायाः कर्तृत्वेन स्मृता दृश्यन्ते तत्र तत्र। वराहमिहिरस्य बृहत्संहिता विषयेऽस्मिन् प्रामाणिको ग्रन्थः।

**होरा** :- जातकं-ताजिकश्च अयमेव फलित ज्यौतिषनाम्ना अपि व्यवह्रियते। वराहमिहिरस्य बृहज्जा-तकम्, नीलकण्ठस्य ताजिकनीलकण्ठी च विषयेऽस्मिन् प्रामाणिकौ ग्रन्थौ।

## द्वितीयं सोपानम् (ग्रहचाराध्याय)

### १) आदित्यचार :

आदित्यः सर्वेषु ग्रहेषु प्रथमतया वर्णितः, अतः अत्रापि आरंभे आदित्यचारनिरूपणंप्रस्तुतं करोति। सूर्यस्य चारं अर्थात् भ्रमणं गतिं वा अवलम्ब्य ज्यौतिषशास्त्रविषयकाः के विशेषाः उद्भवन्ति। तेषां विवरणं आदित्याचारे कृतम्। यथा – प्रतिमासं सूर्यसंक्रमणं भवति। यदा सूर्यः कर्क राशौ भवति ततः आरभ्य षण्मासाः दक्षिणायनम् इति नाम्ना उल्लिख्यते। यदा च सूर्यः मकर राशौ प्रविशति तदा ततः आरभ्य षण्मासाः उत्तरायणम् इति उल्लिख्यन्ते। अनया रीत्या तस्य तस्य विशिष्टचारस्य निरुपणं विस्तरेण अस्मिन् द्वितीयसोपाने कृतं अस्ति।

प्रेरिता ग्रहाः अतिवेगेन , भास्कराचार्यनुसारेण , प्रवहनाम्ना वायुना सततं पश्चिमदिशां प्रति भ्रमणं कुर्वन्ति। किन्तु नक्षत्रैः पराभूताः तं स्व-स्व-कक्षायां पूर्व दिशांप्रति भ्रमणं कुर्वन्ति। अतः एतद् प्रमाणितं भवति यद् ग्रहाः पूर्वदिशां प्रति एव भ्रमणं कुर्वन्ति। स्वकक्षानुसारेण ग्रहाणां दैनिकगतिः भिन्ना-भिन्ना वर्तते। एवं दैनिकगतिं अवलंम्ब्य ग्रहाः राशिचक्रभोगं कुर्वन्तः भगणं प्रदक्षिणी कुर्वन्ति। शीध्रगतियुक्ताः ग्रहाः अल्पकालेन तथा मन्दगति-युक्ताः ग्रहाः बहुकालेन २६ नक्षत्राणि भुंजते। रेवतीनक्षत्रस्य अन्ते ग्रहणेन भगणः परिपूर्णः भवति। को नाम भगणः ? ग्रहेण नक्षत्रमंडलपरिभ्रमणे वा सूर्यंपरितः पूर्णपरिभ्रमणे चः कालः अतिक्रम्यते। स तस्य भगणः कालः अथवा परिक्रम कालः उच्यते। भगणकालः एव ग्रहाणां नक्षत्रकाल उच्यते। बुधस्य परिक्रमणकालः सर्वेभ्यः ग्रहेभ्यः अल्पकालिकः अस्ति बुधः२२ दिनानि एव सूर्यं परितः भ्रमति।

## तृतीयं सोपानम् -(ग्रहयुद्धं)

### १) ग्रहभक्तिः, ग्रहयुगं च

ग्रहभक्तिशब्दे भक्तिशब्दस्य अर्थः विभागः, विभाजनं इति अस्ति। अतः स्वटीकायां भट्टोत्पलेन आरम्भे लिखितं कस्मिन्देशे केषां जनानां कः ग्रहाधिपितिः अस्ति इत्यस्य विभाजनपूर्वकं विवरणं कृतम् अस्ति।

आरम्भे सूर्यस्य वर्णनम् अस्ति। नर्मदायाः पूर्वभागः नदः वंगः, सुह्मः कलिंगः, शकाः, यवनाः, मगधः प्राज्यौतिषम्(आसामः) चीनदेशः पर्वते वसन्तः किराताः यमुनायाः, दक्षिणतरः, नस्करः, वनं वैध्य योध्याः सुर्वर्णा अग्निः कर्षकः राजा सर्पः एतेषां सर्वेषां स्वामी सूर्यः वर्तते।

**२) राशिग्रहसमागमः**

अस्मिन् अध्याये आदौ चन्द्रस्य गतिः, लक्षणं दतं, यदि चन्द्रः नक्षत्राणि ग्रहाणां वा समीपतः प्रदक्षिणक्रमेण उत्तरदिशं प्रति गमनं करोति तदा नृपाणां शुभं भवति। यदि च दक्षिण दिशां प्रति गमनं करोति तदा तेषाम् अशुभं भवति। यदि चन्द्रः भौमस्य समीपतः उत्तरेण याति , तदा पर्वतवासिनां तथा च बलशालिनाम विजयः भवतिः, पृथ्वी धान्यसंपन्ना भवति। एवं बुध गुरु शुक्रादीनां सर्वेषां विषये चन्द्र भ्रमणस्य विवरणं अत्र कृतम्।

## चतुर्थं सोपानम् -(गर्भलक्षणं)

जगतो विश्वस्यान्नं प्राणा असवः। यतः प्राणिनामन्नैर्विना प्राणा न वर्तन्ते। तच्चान्नं प्रावृट्कालस्य वर्षासमयस्यायत्तमाधीनं यस्मादतोऽस्माद्धेतोः प्रयत्नेनातिशयेन प्रावृट्कालः परीक्ष्यो विचार्य इत्यर्थः।।१ ।।

तस्य प्रावृट्कालस्य यानि लक्षणानि विज्ञानकाराणानि मुनिभिर्वसिष्ठादिभिर्निबद्धानि रचितानि तानि दृष्ट्वा अवलोक्य, तथा गर्गपराशरकाश्यपवज्रादिभिर्यानि रचितानि विरचि-तानि। आदिग्रहणाद्बादरायणाऽसितदेवला गृह्यन्ते। तानि सर्वाणि दृष्ट्वा मयेदं प्रावृट्काल-लक्षणं क्रियति इति।।२ ।।

यो दैववित् कालज्ञोऽविहितचितोऽविक्षिप्तचितः, न विहितं चित्तं यस्य, अनन्यमनाः, तत्पर इत्यर्थः। केचिदवहितचित इति पठन्ति। अविक्षिप्तचितो द्युनिशमहोरात्रं यो गर्भलक्षणे भवति तस्याम्बुनिर्देशे वृष्टिकथने मुनेर्ऋषेरिव वाणी गीर्मिथ्या निष्फला न भवतिः, अपि तु सत्यस्व-रूपा भवति। यस्मिन् दिने यस्यां वेलायां स वृष्टिमादिशति तत्र सत्यस्वरूप भवतीत्यर्थः।।३ ।।

अतोऽस्माद् गर्भलक्षणशास्त्राज्ज्योतिः शास्त्राद्वा अन्यदपरं शास्त्रं ज्यायः प्रशस्ततरं किं वास्ति विद्यते। यच्छास्त्रं ग्रन्थं ज्ञात्वा कलौ युगे प्रध्वंसिन्यपि सर्वशास्त्रविनाश-कर्तरि सत्यपि। यतः सर्वशास्त्राणां कलौ दिनानुदिनं ध्वंसोऽस्ति। तथाभूतेऽपि त्रिकालदर्शी भूतभविष्यद्वर्तमान-कालस्य वेत्ता भवतीत्यर्थः।।४ ।।

## पंचमं सोपानम् -(अंतरिक्षोत्पातलक्षणं)

वनस्पतीनां वृक्षाणां फलकुसुमसम्प्रवृद्धिं फलानां कुसुमानां च पुष्पाणां सम्यक् प्रवृद्धिं विलोक्य दृष्ट्वा द्रव्याणां सर्वेषां सुलभत्वं सामर्थ्यं विज्ञेयं विज्ञातव्यम्। तथा सस्यानामपि निष्पत्तिः सम्पद् ज्ञेयेति।।१ ।।

शालो वृक्षविशेषस्तस्य फलकुसुमसम्प्रवृद्धिं दृष्ट्वा कलमशाल्यादीनां निष्पत्तिः सुलभत्वं च ज्ञेयम्। एवं सर्वत्र। तस्माच्छालेन कलमशाली विज्ञातव्या। तथा रक्ताशोकेन रक्तशालिः। पाण्डूकः शालिविशेषः स च क्षीरिकया दुग्धिकया ज्ञेयः। सूकरकः शालिविशेषः, स च नीलाशोकेन विज्ञेयः।।२ ।।

यवकः शालिविशेषः, स च न्यग्रोधेन विज्ञेयः। षष्टिकः शालिविशेषः, स च तिन्दुकवृद्ध्या भवति। अश्वत्थेन सर्वसस्यानां निष्पत्तिर्ज्ञेया ज्ञातव्या।।३।।

जम्बुवृक्षविशेषस्ताभिर्जम्बुभिस्तिलमाषा ज्ञातव्याः। शिरीषो वृक्षविशेषस्तद्वृद्ध्या कङ्गनिष्पत्तिः। कङ्गुः प्रियङ्गुः। मधूको वृक्षविशेषः। तैर्मधूकैर्गोधूमा ज्ञेयाः। सप्तपर्णो वृक्षिविशेषस्तेन यववृद्धि-र्भवति।।

अतिमुक्तको वृक्षविशेषः कुन्दश्च यत्र कुन्दपुष्पाणि भवन्ति। ताभ्यामतिमुक्तककुन्दाभयां कर्पासं वदेत् ब्रूयात्। अशनो वृक्षविशेषस्तैः सर्षपान् वदेद् ब्रूयात्। बदरीभिश्च कुलत्यान् वदेत्। चिरबिल्वेन करञ्जेन मुद्गनादिशेद् ब्रूयात्।।

## षष्ठं सोपानम् -(प्रकीर्णाध्यायः)

भानोरादित्यस्य वृश्चिकप्रवेशे ग्रीष्मसस्यानां यवादीनां वृषप्रवेशे शरत्सस्यानां धान्यादीनां बादरायणेनचार्येण सदसद्योगाः शुभाशुभा ये योगा उक्ताः कथितास्त इमे सर्वे मयाऽत्रकृता इति। एतदुक्तं भवति- यत्र दिने रवेर्वृश्चिकसंक्रमणं भवति तत्र वृश्चिकमेव लग्नं परिकल्प्य वक्ष्यमाणविधिना ग्रीष्मसस्यानां जन्म विचारणीयम्। एवं वृषसंक्रमवेलायां वृषमेव लग्नं परिकल्प्य शरत्सस्यानां जन्म विचारणीयमिति।।१।।

भानोरादित्यस्याविप्रवेशे वृश्चिकप्रवेशसमयेऽयं विचारः। केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैर्यो यत्रावधित्वेन निर्दिश्यते तस्माद्यानि केन्द्राणि लग्नचतुर्थसप्तमदशमानि तैः शुभग्रहाक्रान्तैः। शुभग्रहा बुधगुरुसिताः। अत्रावधित्वेन वृश्चिकप्रवेशावस्थितिः सवितुर्निर्दिष्टा। तस्माददित्यात् केन्द्रैः शुभगंहाक्रान्तैः सौम्यग्रहयुक्तैः। एतदुक्तं भवति – यदा सूर्यस्य वृश्चिकप्रवेशे केन्द्रस्थानानि शुभग्रहा-क्रान्तानि भवन्ति तदा ग्रैष्मिकसस्यविवृद्धिर्भवति, विशेषेण वृद्धिर्विवृद्धिः। सुवृद्धिरित्यर्थः। बलवद्भिः सौम्यैः केन्द्रवर्जमन्यत्रावस्थितैर्भानो निरीक्षिते दृष्टं ग्रैष्मिकविवृद्धिर्भवति। अत्र केन्द्रनिर्दे-शादनन्तरमेव दर्शनशब्दो निर्दिष्टः। तत्केन्द्रगतैरपि ग्रहैर्दृश्यत एव कस्मादाचार्येण दर्शननिर्देशेनैव केवलेन निर्देशः क्रियते। यदादित्यकेन्द्रावस्थितस्य ग्रहस्य कथं प्रदर्शनं घटत इत्युपगम्यापि ब्रूमः। यद्येवं तदा त्वेवं निर्देष्टुं युक्तम्। यथा बलवद्भिः सौम्यैर्दृष्टे भानौ युक्त इति, यस्मादाचार्य-सुष्ठुसमासोक्तिप्रियः परिहारः। बलवद्भिः सौम्यैर्निरीक्षित इत्यस्माद्विकल्पदिदमवगम्यते यदा सौम्यैर्बलिभिरबलिभिर्वा केन्द्रस्थानानि युक्तानि भवन्ति तदा ग्रैष्मिकसस्यविवृद्धिर्भवति। यदा तु पुनस्त्रिकोणरिपुलाभगाः सौम्या बलिनः पश्यन्ति तदा ग्रैष्मिकस्य विवृद्धिर्भवति। मध्यबलैर्याप्यता। बलहीनैर्मनागपि सस्यानां वृद्विर्भवति। तथा च बादरायणः-

**वृश्चिकसंस्थे सूर्ये सौम्यैर्बलिभिर्निरीक्षिते वृद्धिम्।**
**तैरेव केन्द्रगैर्वा ग्रीष्मजधान्यस्य निर्दिशेन्महतीम्।। इति।।**

अर्के रवावष्टमराशिगते वृश्चिकस्थे इत्यर्थः। गुरुशशिनार्जीवचन्द्र-योर्यथाक्रमं कुम्भसिंह-संस्थयोः। कुम्भे गुरुः शशी सिंहे। अथवा सिंहघटसंस्थयोः। गुरुः सिंहे शशी घटे। तथापि ग्रीष्मसस्यस्य निष्पत्तिर्वक्तव्येति।।३।।

## सप्तमं सोपानम् -(वास्तुविद्या)

**वास्तुशब्दस्य व्युत्पत्तिः, व्याख्या, इतिहासः, विकासः, महत्त्वं च**

बृहत्संहितायाः उत्तरार्धे वास्तुविवेचनम् वराहमिहिरेण सविस्तरं कृतम्। वास्तु विषयकं शास्त्रीयज्ञानं बहमदेवात् विनिर्गतम् परंम्परातः पृथ्वीतलं अवतीर्णम्। अस्मिन् विषय एकं आभाणकं तत्र दत्तम्। पुरा एकः उद्भूतः जीवः स्व शरीरेण पृथ्वीं आकाशंच आच्छादितवान्। देवैः सः निगृहीतः , तस्य मुखं अधः कृतम् पृथिव्यां च स्थापितम्। येन देवेन तस्य यत् अंग निगृहीतं तस्मिन् एव अंगे सनिवासनं कृतवान्। अस्य देवमय पुरुषस्य वास्तुपुरुष इति नाम कृतम्।

देवा वसंन्ति अस्मिन् अतः स वास्तुपुरुष इति उच्यते। वास्तुशब्दस्य प्रयोगः ऋग्वेदे कृतः दृश्यते। तथा हि- अन्यत्रापि च, वास्तु शब्दस्य प्रयोगः कृतः।

वास्तुपुरुषस्य उत्पत्तिविषये विविधाः कथाः विविधेषु ग्रन्थेषु उल्लिखिताः दृश्यन्ते तथा हिः-

मत्स्य पुराणानुसारेण पुरा शिवस्य अंधकासुरेण सह धोरयुद्धं जातम्, तत्र परिश्रमेण भगवतः शिवस्य ललाटतः प्रस्वेदः अगलत् अस्मात् स्वेद जलात् भीषणः पुरुषः उत्पन्नः, सः अंधकासुरस्य रुधिरम् अपि अपिबत्, शिवेन तस्य मुखम् अधः कृत्वा ईशान कोणे स्थापितः। वास्तुमंडल ग्रन्थेअपि इयमेव कथा किंचित् वैविध्येन उपलभ्यते।

**वास्तुशब्दस्य व्यापक विस्तरः।**

वास्तुशब्दस्य सामान्यः अर्थः निवासयोग्या भूमिः अथवा भवनं इति अस्ति। किन्तु विश्वकर्मानुसारेण यत्र देवाः मनुष्याः गजाः अश्वाः गवादयश्च निवासं कुर्वन्ति तद् वास्तु इति उच्यते। यथाः-

**देवतानां नराणां च गजगोवाजिनामपि।**
**निवासभूमिशिल्पज्ञैर्वास्तुसंज्ञमुदीरितम्।।**

अस्मिन् विषये मयमतं किंचित् भिन्नम् एव दृश्यते। यत्र अमर्त्याः अर्थात् देवाः – मर्त्याः अर्थात् मनुष्यादयः वसंति तत् स्थानं वास्तु इति उच्यते। मानसारग्रन्थेऽपि अयमेवअर्थः प्रतिपादितः अस्ति। मानसारग्रन्थे अस्मिन् विषये सूक्ष्मं विवेचनं वर्तते, यथा-

| | |
|---|---|
| कृतं - १ धरा (भूमिः) | २ हर्म्यः (प्रासादः) |
| ३ पानं (वाहन्म ) | ४ पर्यंकादि (शयनीयम् ) |

एतत् सर्वं वास्तुशब्देन उच्यते। तथापि, मुख्यतया वास्तु शब्दः भवनस्य भूमिः इति अर्थे एव प्रयुज्यते।

## अष्टमं सोपानम्

**अ) वृक्षायुर्वेदः**

वृक्षायुर्वेदः इति नाम अग्निपुराणे (२८२ अध्यायः), बृहत्संहितायां (५४) च विशेषतया दृश्यते। तत्तु विशिष्टपुस्तकरूपेण सुरपालः विश्ववल्लभश्च निर्मितवन्तौ। सुरपालस्य कालः ७ ए.डी. तः १४ ए.डी. पर्यन्तं विविधप्रकारेण भिद्यते। परं सामान्यतया ११ ए.डी. इति स्वीकृतं वर्तते।

अग्रि हिष्टरि फौण्डेशन एष्यन् कृषि - इतिहास केन्द्रम् - भाग्यनगरं १९९६ तमे वर्षे एतस्य हस्तलिखितपुस्तकस्य प्रकाशनमॅ अकुरुत। [२६] ३२५ श्लोकयुक्तस्य अस्य पुस्तकस्य प्रतिकृतिं ते इंग्लेन्ड ब्रोडलियन ग्रन्थालयात् प्राप्तनुवन्। अत्रत्याः विषयाः बृहत्संहिताः बहूनां विषयाणां च समानता अस्ति। वृक्षायुर्वेदः, कुसुमलता, दकार्गलम् , वास्तुविद्या, मृत्, वृक्षारोपणं, दोहदः, रोगाः चिकित्सा , उद्यानानि ,इत्येतेषां विषये आधिक्येन ग्रन्थेऽस्मिन् विवरणं दृश्यते। ए.डी. १६ शतके चक्रपाणिमिश्रेण विरचितः वृक्षायुर्वेदोऽपि बहुषु विषयेषु समानताम् एति [२७]। उपवनक्रिया कूपार्थभूमिपरीक्षा अपि ग्रन्थेऽस्मिन् विषयकृतो दृश्यते। वात-पित्त- कफ-दोषदिशा वृक्षाणां भेदाः, रोगाः तन्निवारणमार्गाश्च वर्तन्तेऽस्मिन् ग्रन्थे।

**ब) दकार्गलम्-**

वास्तुनिरुपवान्तरं दर्कगल विषयंक शास्त्रीय विवेचनं ग्रन्थकारेण कृतम्। आरम्भे एव दर्कागल शब्दस्य अयं निस्त्र्ययं आचार्य वराहमिहिराः आह दर्कागलं धर्मपूर्वं तथा यशोदायकं वर्तत।

येन मार्गेण जलस्य उपलब्धिः भवति तद् दकार्गलं इति उच्यते। यथा पुरुषस्य शरीरे अनेकाः शिराः प्रस्तुता : संति तथा भूमेः अर्न्तभार्गे अनेकाः जलधारिण्यः शिराः वर्तन्ते। आकाशात केवलं एक स्वाद् युक्तं जल वर्षति किन्तु, भूमौ यदा तद् जलं पतति तदा भूमेः वर्वादि अनुसारिया तद जलं विविध स्वाद् युक्तं भवति। तस्य विस्तृतं विवेचनं अत्र कृतम्।

**क) रत्न परीक्षणविषये:**

विस्तरेण ग्रन्थकृता विवेचनं कृतम्। किं नाम। त्नम रमन्ते अस्मिन जनाः इति रत्नम्। शुभरत्न धारणेन नृपाणं सर्वं शुभं भवति। तथा अशुभरत्न धारणेन अशुभं भवति। अतः नृपैः रत्न पंडितैः रत्नगत देवानो शुभाशुभ परीक्षणं अवश्यं कर्तव्यम्। अजयकोषानुंषारेण “जातौ जातौ” यदुकृष्टं तद् रत्नं अभिधीयते यथा गांधिमहात्मानर रत्नम्, पद्मिनी स्त्रीरत्नम् इत्यादि प्रयोगाः लक्षणया भवन्ति। वराहमिहिरः प्रकरणस्य आरंभे लिखति यत् अत्र वयं पाषाण निर्मित रत्नानां परीक्षण विषये विवेचनम् कष्यिामः न तु अन्येषां रत्नानां विषये।

**<u>नवमं सोपानम्</u>**

**अ) पशुपक्षिलक्षणं**

पराशराख्यो मुनिर्बृहद्रथाय शार्ङ्गरवनाम्ने स्वशिष्याय यद् गोलक्षणं प्राहोक्तवान्, ततस्तस्माद् गोलक्षणान्मया आचार्येण समासः संक्षेपः क्रियते। सर्वाः समस्ता गावः शुभलक्षणाः प्रशस्त-लक्षणाः। अपिग्रहणांदशुभलक्षणाः सर्वा निःशेषास्तथा तेनैव प्रकारेणागमत आगमाद् मुनिप्रणीताच्छा-स्त्रादभिधास्ये कथयिष्ये।।

यश्च घ्राणोद्देशे नासायां सवलिर्वलियुक्तः। मार्जारमुखो बिडालतुल्यवदनः। दक्षिणतो दक्षिण-भागे सितः शुक्लवर्णः। कमलोत्पललाक्षामः कमलं पद्मम, उत्पलं नीलोत्पलम्, लाक्षा प्रसिद्धा लोहितवर्णा। आसां सदृशी आभा कान्तिर्यस्य। सुवालधिः शोभनपुच्छवालः। वाजितु-ल्यजवः, वाजी तुरगः, तत्तुल्य-स्तत्सदृशो जवो वेगो यस्य। शीघ्रगतिरित्यर्थः।

**ब) स्त्री-पुरुषलक्षणं**

उन्मानं च मानं च गतिश्च संहतिश्च सारश्च वर्णश्च स्नेहश्च स्वरं च प्रकृतिश्च सत्त्वं च तदुन्मानमा-नगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्त्वम्। न केवलमुन्मानमानाद्यं यावदनूकं क्षेत्रं मृजां च। आदौ प्रथमं पुरुषलक्षणं सामुद्रम। तद्वेति जानातीनि सामुद्रवित्, समुद्रे प्रोक्तं पुरुषलक्षणं सामुद्रम। तद्वेति जानातीति सामुद्रवित्, वदति कथयतीति। यातमतिक्रान्त-मिष्टानिष्टफलम्। न केवलं यावदनागतमेष्यद्वेति। अत्र केचिन्मन्यन्ते। प्रकृतिपर्यायं सत्त्वमाचार्येण व्याख्यातम्। एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् इति। तस्मात् सत्त्वशब्दमत्रातिरिच्यते। जातिरिच्यंत इत्युच्यते। सत्त्वं नाम चेतोधर्मः, यस्मिन् सति न कुतश्चिद्भयमुत्यद्यते, न कस्यामप्यवस्थायां विषादः समुपजायते, तत्समाचक्षते कुशलाः।

**क) स्त्री-पुरुष राजचिह्नानि**

यस्याः कुमार्याः कन्यकायाः। पादौ चरणौ। स्निग्धोन्नताग्रतनुताम्रनखौ स्निग्धौ सस्नेहावुन्नतावुच्चौ कूर्मपृष्ठौ, अग्रे तनू ययोः। ताम्रनखौ रक्तवर्णौ नखौ ययोः। समोपचित-चारुनिगूढगुल्फौ समौ तुल्यावुपचितौ समांसलौ चारू दर्शनीयौ निगूढावनुल्बणौ गुल्फौ ययोः। तथाश्लिष्टाङ्गुली श्लिष्टा घना अङ्गुल्यः पादशाखा ययोः। कमलकान्तितलौ कमलस्य पद्मस्येव कान्तिस्तले ययोः। तथाभूतौ पादौ यदि भूवो भूम्या अधिपतित्वं राज्यमिच्छेत् तदा तामुद्वहेत्।

मत्स्याङ्कुशाब्जेति। मत्स्यो मीनः। अङ्कुशः प्रसिद्धः। अब्जं पद्मम्, यवो यवाकारः, वज्रमायुधम्। हलं लाङ्गलम्। असिः खड्गः। एतैश्चिहैश्चिह्नितौ चरणौ पादौ। तथाऽस्वेदनौ स्वेदरहितौ। मृदुतलौ मृदुनी मृदुनी तले ययोस्तौ तथाभूतौ प्रशस्तौ। तथा च समुद्रः।

**ड) पशुपक्षि चेष्टा -**

यत् शाकुनं शक्र इन्द्रः, शुक्रो भार्गवः, वागीशो बृहस्पतिः, कपिष्ठलो मुनिः, गरुत्मान् वैनतेयः। एषां शास्त्रकर्तॄणां मतेभ्यः ऋषभाख्य आचार्यः प्रोक्तवान्। तथा भागुरेर्मुनेर्देवलस्य च मुनेर्मताद्यच्छाकुनम्, ऋषभाख्यः प्राह।

भारद्वाजमतमिति। यच्च शाकुनं भारद्वाजाख्यस्य मुनेर्मतं दृष्टावलोक्य श्रीद्रव्यलोके महाराजाधिराजवंशप्रसूत आवन्तिक उज्जयिन्या नृपो राजा प्राहोक्तवान्।

मतं सप्तर्षीणामिति। यच्छाकुनं सप्तर्षीणां मरीच्यादीनां मतम्। यच्चान्यत् संस्कृतं लोके व्यवहारित। यच्च प्राकृतं शाकुनं संस्कृतवाचा रहितम्। यानि च शाकुनानि गर्गाद्यैर्गर्गवसिष्ठ-पराशरकाश्यपैर्ऋषिपुत्रैर्भूरिभिर्बहुभिर्यात्राकारैरुक्तानि कथितानि।

तानि च दष्टवालोक्येमं वराहमिहिरो वराहमिहिराख्यो मगधद्विजः शिष्याणां प्रीत्या हेतुभूतया प्रीत्यैव प्रीत्यर्थं सर्वशाकुनसंग्रह संक्षेपमुत्तमं प्रधानं चकार कृतवान्।।